International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 11-14
© 2026 IJMH
www.themultijournal.com
Received: 23-02-2026
Accepted: 28-02-2026
Publish : 05-03-2026

**शीर्षेन्दुविश्वासः**
गवेषकः,
श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृत-विश्वविद्यालयः, नई दिल्ली

**Correspondence:**
**शीर्षेन्दुविश्वासः**
गवेषकः,
श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृत-विश्वविद्यालयः, नई दिल्ली

# अधिशास्त्रदीपिकम् अपूर्वास्तित्वविचारः

**शीर्षेन्दुविश्वासः**

## प्रस्तावना

मीमांसादर्शनं वैदिकधर्मस्य तात्त्विकव्यवस्थापनाय प्रधानं दर्शनम् अस्ति। अस्य मुख्यप्रयोजनं वेदविहितानां कर्मणां प्रमाणत्वम्, अर्थवत्त्वं, तथा फलप्राप्तेः युक्तिसिद्धताया च निरूपणमस्ति। एतस्मिन् सन्दर्भे “अपूर्व” इति सिद्धान्तः मीमांसायाः मौलिकतमः, अपरिहार्यश्च पदार्थः मन्यते। अपूर्वविचारं विना यागादिकर्मणां फलोत्पत्तिः तर्कतः न सम्यक् व्याख्यायेत। “अपूर्व” इत्यस्य शाब्दिकार्थः पूर्वमविद्यमानम् इति भवति। मीमांसादर्शने एषः शब्दः विशेषार्थं बिभर्ति। यत् कर्मानुष्ठानसमये उत्पद्यते, यत् न प्रत्यक्षगोचरं, न च तात्कालिकफलरूपं, किन्तु भविष्यत्फलस्य कारणरूपेण अवस्थितं तत् अपूर्वम् इति कथ्यते। संक्षेपेण— कर्मणा जन्यं, अदृष्टं, फलप्रदं कारणम्- अपूर्वम् इति। अत्र मुख्यप्रश्नः अयम्-“यागादिकर्मणां फलम् (स्वर्गादिः) चिरकालानन्तरं भवति, तदा कर्मफलयोः सम्बन्धः कथं सिद्ध्यति?” प्रत्यक्षतः यागकर्मसमाप्तौ तत्क्षणं स्वर्गप्राप्तिर्न दृश्यते। यदि कर्म नश्यति, फलञ्च चिरकालानन्तरं भवति, तर्हि तयोः मध्ये किं सेतुरूपं तत्त्वम् अस्ति? एतस्य उत्तररूपेण अपूर्वसिद्धान्तः प्रतिपादितः। मीमांसादृष्ट्या अपूर्वम्—कर्मजन्यम् अस्ति, इन्द्रियगोचरं न भवति, नित्यं नास्ति किन्तु कर्मविशेषजन्यम्, अदृष्टस्वभावकम्, फलोत्पत्तेः नियामकं कारणं च भवति। यागादिकर्मणि अनुष्ठिते सति कर्तृसम्बद्धं किञ्चिद् अदृश्यं सामर्थ्यम् उत्पद्यते—तदेव अपूर्वम्। इदं कालान्तरे देशान्तरे वा यदा अनुकूलसामग्रीसमवायः भवति, तदा फलप्राप्तिं जनयति। मीमांसादर्शने कारणकार्यभावः अत्यन्तं महत्त्वपूर्णः। प्रत्यक्षकारणस्य (कर्मणः) नाशेऽपि यदि कार्यं (स्वर्गः) भवति, तर्हि अवश्यं किञ्चित् स्थायिकारणम् अपेक्षितम्। अपूर्वं तदेव कारणम्— कर्म → अपूर्वोत्पत्तिः, अपूर्वम् → फलोत्पत्तिः , अतः अपूर्वं मध्यवर्तिकारणत्वेन (intermediate causal link) स्वीक्रियते।

अपूर्वं कुत्र स्थितम्? मीमांसकाः मन्यन्ते— अपूर्वं कर्तुः आत्मनि आश्रितम्. कर्मफलभोगे यः कर्ता, तस्यैव आत्मनि अपूर्वं संचितं भवति, अतः कर्मकर्तुः नैतिक– धार्मिकउत्तरदायित्वम् अपूर्वसिद्धान्तेन दृढीकृतं भवति।

नैयायिकदर्शने “अदृष्टम्” इति यत् तत्त्वं स्वीक्रियते, तस्य तुलनायां मीमांसायां “अपूर्वम्” अधिकं विशिष्टम्। अदृष्टं सामान्यपुण्यपापरूपं, किन्तु— अपूर्वं विशिष्टकर्मजन्यं वेदविहितकर्मविशेषसापेक्षं फलविशेषनियतम् इति भेदः। मीमांसायां वेदः स्वतःप्रमाणम्। वेदवाक्येषु यदा स्वर्गादिफलश्रुतयः दृश्यन्ते, तासाम् अर्थवत्त्वम् अपूर्वकल्पनया एव सिद्ध्यति। यदि अपूर्वं न स्वीक्रियेत, तर्हि— वेदविहितकर्मणां फलश्रुतयः व्यर्थाः स्युः धर्मकर्मणां प्रेरणा न स्यात् अतः अपूर्वं वेदधर्मसंरक्षणस्य तात्त्विकाधारः अपि अस्ति। अन्यदर्शनैः अपूर्वसिद्धान्तः आलोचितः— वेदान्ते ईश्वरः एव फलदाता इति मतम्, बौद्धैः क्षणिकतावादेन अपूर्वस्य स्थायित्वे प्रश्नः कृतः, तथापि मीमांसकाः अपूर्वम् ईश्वरनिरपेक्षं, कर्मस्वातन्त्र्यसंरक्षकं, तथा धर्मव्यवस्थापरकं तत्त्वं मन्यन्ते। मीमांसादर्शने अपूर्वं केवलं दार्शनिककल्पना न, अपि तु वैदिककर्मव्यवस्थायाः प्राणतत्त्वम् अस्ति। कर्म– फल– कालभेदस्य तर्कसङ्गतसमाधानं

अपूर्वसिद्धान्तेन एव सम्भवति। अयं सिद्धान्तः धर्मस्य, उत्तरदायित्वस्य, तथा वैदिकप्रेरणायाः दार्शनिकम् आधारं सुदृढं करोति।

**मीमांसादर्शनम्**

मीमांसादर्शनस्य भारतीयदर्शनेषु श्रेष्ठमन्यतमं च स्थानम्। इदं दर्शनं मूलतः अनीश्वरवादि दर्शनमस्ति । यद्यपि कतिपये विचारका मीमांसादर्शनं दर्शनरूपेण स्वीकर्तुं विवदन्ते तथापि वेदानां कर्मपरताव्याख्यां धर्मस्वरूपविचारं च दृष्ट्वाऽमुष्य दर्शनस्वरूपे आपत्तिर्नास्ति । इतरदर्शनेष्विव मीमांसादर्शनेऽपि आत्मतत्त्वस्य विचारो विहितः। अतो यथा उत्तरमीमांसायाम् अर्थात् वेदान्ते आत्मेश्वरयोः प्रतिपादनात् दार्शनिकता स्थिरीक्रियते तथा पूर्वमीमांसायामपि तादृशविवेचनात् दार्शनिकताऽवश्यमेव स्वीकार्या।

मन् धातोर्निष्पन्नो मीमांसा शब्दः पूज्यविचार-यथार्थवस्तुरूप-अनुसन्धानादिषु अर्थेषु गृह्यते। वेदस्य कर्मसिद्धान्तानुगतव्याख्या मीमांसादर्शनस्य प्रधानलक्ष्यमस्ति। दर्शनशास्त्रे वेदस्य रूपद्वयं प्रसिद्धमस्ति –कर्मकाण्डः ज्ञानकाण्डश्चेति। ज्ञानकाण्डः उत्तरमीमांसाया विषयोऽस्ति, यत्र वेदस्य ज्ञानपरकं विश्लेषणं कृतम्। किन्तु कर्मकाण्डः पूर्वमीमांसायाः विषयो वर्तते, अतः पूर्वमीमांसा एव कर्ममीमांसा इत्यपि कथ्यते ।

मीमांसदर्शने वेदविहितं कर्म एव धर्मरूपेण प्रतिपादितम्। तदेव इहलौकिकानां पारलौकिकानां च सुखानां साधनमस्ति। यदा कर्म एव सुखदुःखयोः मूलकारणं भवति तदा तस्य सूक्ष्मविश्लेषणकारकं शास्त्रं कर्ममीमांसैव उपयुक्तं प्रतीयते । मीमांसादर्शनम् अतिप्राचीनम् अस्ति। ब्राह्मणग्रन्थैः उपनिषद्ग्रन्थैश्च सूचितं भवति यत् प्राक्तनैः ऋषिभिः अनेकेषु अस्पष्टविषयेषु युक्तियुक्ताः विचाराः प्रस्तुताः। ते कर्ममीमांसाया आधारतत्त्वरूपाः सन्ति ।

मीमांसादर्शनस्य सर्वाधिकं महत्त्वपूर्णं तत्त्वं धर्मविचारोऽस्ति। धर्मस्य आधारशिला कर्मकाण्डम् आधारीकृत्य तिष्ठति। उत्तरमीमांसाम् अतिरिच्य चार्वाक-जैन-बौद्धैः वैदिककर्मकाण्डस्य खण्डनं कृतम् । आत्मनो नित्यता इतरवैदिकदर्शने यथा स्वीक्रियते तथैवात्रापि अभीष्टा वर्तते । मीमांसादर्शनस्य मतानुसारं मृत्यूत्तरमपि आत्मा स्वकीयानां शुभाशुभकर्मणां फलानि प्राप्नोति। मीमांसायां 'स्वर्ग' नामकस्य स्वतन्त्रतत्त्वस्य व्याख्या कृताऽस्ति। यतो हि वैदिककर्मकाण्डेषु प्रवृत्तेर्मूलाधारः स्वर्ग एवास्ति। मृत्योरनन्तरं स्वर्गप्राप्तिर्भवति । स्वर्गः कः? अस्मिन् विषये तत्रोक्तम्[1] - एतत्कृते 'अपूर्व'स्य सिद्धिरपि मीमांसकैः कृता यतो हि कर्मणि तु जीवितावस्थायामेव क्रियन्ते, किन्तु स्वर्गादीनां प्राप्तिर्मृत्योरनन्तरं भवति । कर्मणि सम्पन्ने सति तदुत्पन्नम् अपूर्वम् आत्मनि अवतिष्ठते तदेव च मृत्योरनन्तरं स्वर्गादि प्रापयति ।

जीवनस्वर्गयोरन्तराले कर्मकाण्डजन्यम् अपूर्वमेव सेतुरूपमस्ति। अपूर्वमेव पापपुण्ययोराशयः वर्तते । वेदः कर्मविधानं करोति । वेदाः अपौसरुषेयाः सन्ति। अतस्तत्र काम-क्रोध-लोभ-मोह-मात्सर्यादयः पुरूषदोषा न सन्ति। अतः वेदविहितं कर्म एव धर्मः । अयमेव मीमांसायाः मान्यः सिद्धान्तोऽस्ति । मीमांसा स्वीकरोति यत् इदं जगत् सत्यमेव अस्ति। अस्य मिथ्यात्वं निराधारकल्पना वर्तते । मीमांसाशास्त्रस्य सूत्रमारः महर्षिः जैमिनिः। अस्मिन् शास्त्रे धर्मानुष्ठानेनैव अभिमतफलसिद्धिर्भविष्यतीति मतम्। अत्र वैदिकयज्ञानामेव मुख्यधर्मत्वं स्वीक्रियते। धर्मानुष्ठानं तु श्रुतिस्मृति-पुराणद्यनेकधर्मग्रन्थेषु प्रसिद्धमस्ति। धर्मस्य लक्षणं किम्? धर्मे प्रमाणं किम् । इत्यादिशङ्कानां समाधानं पूर्वमीमांसाशास्त्रादेव सिद्धं भवति। एतच् शास्त्रं षोडशाध्यायात्मकं वर्तते । तत्र द्वादशाध्यायाः प्रसिद्धाः सन्ति । प्रत्येकस्मिन् अध्याये चत्वारः पादाः विलसन्ति । परं तृतीयेध्याये अष्टौ पादाः सन्ति, एवमेव षष्ठे दशमे च।

**शास्त्रदीपिकाग्रन्थस्य वैशिष्ट्यं ग्रन्थकाराणामितिवृत्तञ्च**

पार्थसारथिमिश्रः मीमांसकः आसीत्।मीमांसाशास्त्रपारावारपारदृश्वा[2] यज्ञात्मतनयः पार्थसारथिमिश्रः कौमारिलं सम्प्रदायं स्वविरचित-ग्रन्थावल्यालञ्चकार। महाभागोऽयं कुत्रत्यं भूमण्डलमलमकरोदित्या-काङ्क्षायामुच्यते यन्मिथिलाप्रदेशमिति। कदा भूमण्डलं मण्डयामास इत्यत्रोच्यते यत् प्रायेण द्वादशशतके इति। यतोहि चतुर्दश-शतकोत्पन्नमाधवाचार्यस्य जैमिनीयन्यायमालाविस्तरे पार्थसारथिकृत शास्त्रदीपिकायाः उल्लेखो[3] दृश्यते इत्यतः ततः प्राचीनोऽयमिति सिद्ध्यति, श्लोकवार्तिकस्य च व्याख्यानकरणात् कुमारिलादर्वाची-नत्वमस्य सिद्धम्। ततश्च मध्यवर्तिनोऽस्य द्वादश-शतकोत्पन्नत्वं युक्तमेवेति प्रतिभाति। मीमांसकप्रवरेणानेन ग्रन्थचतुष्टयं न्यबन्धि–

१) न्यायरत्नमाला– मिश्रस्य प्रथमा कृतिरियं प्रकरणग्रन्थः। अत्र प्रयुक्तितिलकः, स्वतः प्रामाण्यनिरूपणं, विधिनिर्णयः, नित्यकाम्य-विवेकः, अङ्गनिर्णयः, व्याप्तिविवेकः इति सप्तशास्त्रविषयाः प्रपञ्चिताः। ग्रन्थमिममधिकृत्य रामानुजाचार्यः नायकरत्नाख्यटीकां निबबन्ध। शालिकनाथेन प्रकरणपञ्चिकायामुपस्थापितस्य प्रभाकर-मिश्रस्य मतखण्डनपुरस्सरं कुमारिलमतमण्डनमत्र विद्यते इति विशेषः।

२) तन्त्ररत्नम्– कुमारिलकृतटुप्टीकाया व्याख्यानभूतोऽयं मिश्रस्य द्वितीयो ग्रन्थः।

३) शास्त्रदीपिका– पार्थसारथिमिश्रस्य तृतीया कृतिरियम्। अत्र कुमारिलवार्तिकमधिकृत्य अधिकरणप्रस्थानं सप्रपञ्चं वर्णितम्। विषय-विशय-पूर्वपक्ष-सिद्धान्त-प्रयोजन-सङ्गतीति विषयषट्कस्य सुस्पष्टं निरूपणं कृतम्। प्राधान्येन गद्यमयी इयम्। परन्तु तत्र तत्र पद्यमपि उपलभ्यते। ग्रन्थेऽस्मिन् मिश्रेण पाण्डित्यस्य पराकाष्ठा प्रदर्शिता।

४) न्यायरत्नाकरः– श्लोकवार्तिकव्याख्यानभूतोऽयं मिश्रविरचितश्चतुर्थो ग्रन्थः। महाभागेनानेनात्र शास्त्रीयाण्यशास्त्रीयाणि वा मतानि सूक्ष्मेक्षिकया परिभाव्य स्वमतमपि प्रकटीकृतम्। मिश्रमहोदयस्य वैदुष्यं शास्त्रगाम्भीर्यञ्च ग्रन्थस्यास्य पठनेन स्फुटं प्रतीयते।

**अपूर्वविचारः**

अपूर्वशब्दः प्रायेण फलवाचकः। यथाविग्रहं शब्दस्य व्युत्पत्तिं दर्शयन्ति शब्दकल्पद्रुमकाराः **नास्तिपूर्वं पूर्वकालभवं दृष्टं यस्य तत्**[4]। इत्येवम्प्रकारेण अदृष्टस्य कस्यचित्पदार्थस्य वाचकः अपूर्वशब्दो भवति। मीमांसादर्शने अपूर्वस्य बहुधा चर्चा समायाति। मीमांसानुसरणशीलानां कृते अपूर्वे नाम स्वर्गादेः फलात् प्राक् फलसूचकं किमपि भवति तदेव अपूर्वम् अस्य च अदृष्टत्वं सिद्धं वर्तते। यथा न्यायशास्त्रे करणफलयोर्मध्ये अवान्तव्यापारो भवति परमयमवान्तव्यापारः दृष्टिगोचरः भवति परं मीमांसाकानां करणफलयोः मध्ये यन्नदृश्यते तदेवापूर्वम् इति व्यवस्थितम्। अथातः यथाविषयमनुसरामः शास्त्रदीपिकाकारेण द्वितीयाध्यायस्य प्रथमे पादे सर्वादौ भावार्थाधिकरणस्य चर्चा विहिता। एतावत्याः चर्चाया अनन्तरं ग्रन्थकारः पूर्वचर्चितस्यादौ विषयस्य चर्चां विदधाति। ग्रन्थकारः अस्तित्वपूर्वाधिकरणस्य आरम्भात् प्राक् सङ्केतयति **"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत्" श्येनेनाभिचरन् यजेत** इत्यादिषु वाक्येषु भावशब्देभ्यः अपूर्वस्य सिद्धिः कृता, अपूर्वसिद्धये भावप्रतिपादकः शब्दः भावार्थाधिकरणे विमृष्टः। यथाह शास्त्रदीपि-कारकारः-

**दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत श्येनाभिचरन यजेत् इत्येवमादिष्वपूर्वं सिद्धं कृत्वा तत्प्रतिपादकशब्दविशेषो विचारितः।**[5]

परमत्र अपूर्वस्य आदौ यत् सिद्धीकरणं प्रस्तुतं तस्य असिद्धस्य प्रसङ्ग उदेति। पूर्वपक्षः आक्षिपति श्येनादिषु वाक्येषु अपूर्वस्य सिद्धीकरणाय तत्प्रतिपादकशब्दः विचारितः। अनेन अपूर्वस्य अस्तित्त्वस्य सिद्धिरेव न सम्भाव्यते- **तस्य त्वस्तित्वमेवासिद्धमिति।**[6]

प्रकृतस्थले अस्तित्वशब्दोऽपि प्रसङ्गवशाद् विचारणीयो भवति। अस् धातोः स्तिक्प्रत्यये अस्ति इति निपातनस्य सिद्धिर्भवति, यस्यार्थो भवति विद्यमानः। अथास्माद् शब्दात् **तस्य भावस्त्वतलौ**[7] इत्यनेन लक्षणेन भावेऽर्थे त्वप्रत्यये अस्तित्वशब्दः निष्पद्यते, यस्यार्थो भवति विद्यमानता।

अपूर्वस्य विद्यनमातायाः असिद्धिः पूर्वपक्षेण उपस्थापिता। अथातः पूर्वपक्षिणः समस्यायाः समाधाननिमित्तमदः अधिकरणम् आरभ्यते। तत्र प्रथमतो विचार्यते अपूर्वं नाम किं यागः यः करणत्वेन अन्वेति? तदतिरिक्तं किञ्चिद्? अथवा स्वर्गादिः यः अन्वेति फलत्वेन? तद् अतिरिक्तं किञ्चिद् अथवा उभयातिरिक्तं किञ्चित्? सत्यामेतादृश्यां शङ्कायां भावार्थोऽपि प्रकृतस्थले विचार्यते भावस्य यः अर्थः वाक्यावगतः सोऽसौ अर्थः किं? स्वर्गयागादिः साध्यसाधनभावः? किम् अपूर्वातिरिक्तमपि सिद्ध्यति आहोस्वित् न सिद्ध्यति? यथोक्तं ग्रन्थकारेण-

**तत्प्रतिपादनार्थयारभ्यते- कियेतेष्वपूर्वं नाम यागस्वर्गातिरिक्तमस्ति न? इति विचारः। तदर्थञ्च किं वाक्यावगतः स्वर्गयागादिसाध्य साधनाभावोऽपूर्वमन्तरेणापि घटते? न? इति।**[8] सत्यामेतादृश्यां शङ्कायां ग्रन्थकारः श्लोकमुद्धरति-

**तत्साध्यसाधनभावो हि श्रूयते स्वर्गयागयोः।**
**वस्त्वन्तरस्य सद्भावे श्रुतिरेव विरुद्ध्यते।।**[9]

यदि श्रुतिसनुसरामः तदा यागस्य तथा च स्वर्गस्य उभयोरपि अपूर्वत्वम् असिद्धम्। यदि फलस्य अपूर्वत्वं कल्प्यते तदापि श्रुतिविरुद्धम्, अथ च करणस्य अपूर्वत्वं कल्प्यते तदापि श्रुतिविरुद्धम्, अतः इदं ध्येयं भवेत् अपूर्वं नाम करणफलयोर्भिन्नं किमपि यतः स्वर्गयागयोः साध्यसाधनभावस्य प्रसिद्धिरस्ति। यथोक्तं शास्त्रदीपिकाकारेण-

**वस्त्वन्तरं हि कल्प्यमानं यागसाध्यं स्वर्गसाधनं च कल्प्येत तच्चोभयमपि श्रुतिविरुद्धम्, स्वर्गयागयोरेव साध्यसाधनभाव-श्रवणात्।**[10]

यदि कोऽपि एवं शङ्कां कुर्यात् विना अपूर्वं क्षणिकयागस्य कथं कालान्तरफलसाधनत्वम् अथ च यदि अपूर्वस्य कल्पनापि स्यात्तथापि कथं यागस्य साधत्वनमिति सम्भवेत्। उभयथा फलात् प्राक् फलसूचकत्वात् अस्य अपूर्वस्य साधनत्वं प्रसिद्धं स्यात् न तु यागस्य साधनता। यदि एवं ब्रूमो यागस्यैव शक्तिः अथवा अवान्तरव्यापारः अपूर्वमस्तीति चेत् तदपि न युक्तियुक्तं यतः प्रकृतस्थले शक्तिव्यापारयोरवस्थानायोगः। अतः यागस्य विनाशे (समाप्ते) यागः फलं साधयति, न अपूर्वं फलं साधयति (सूचयति)। यथाह शास्त्रदीपिकाकारः-

**यागस्यैव शक्तिरवान्तरव्यापारो वाऽपूर्वमिति चेन्न शक्तिमति व्यापारवति चातीते शक्तिव्यापारयोरनवस्थानायोगात्। तस्याद्याग एव विनष्टोऽपि फलं साधयति।**[11]

अपूर्वं फलं न साधयति इति शङ्कायां शास्त्रदीपिकाकारः एकं श्लोमुद्धरति-

**विनष्टस्यासतस्तरवन्त कार्यारम्भसम्भवः।**
**क्षणिकत्वेन सिद्धस्य नावस्थानं च युक्तिमत्।।**[12]

क्षणिकत्वेन केनापि पदार्थेन कर्मणा वा सिद्धस्य फलस्य अवस्थानम् इति वचनं तर्कसङ्गतम् इत्युक्त्वा ग्रन्थकारः निर्दिशति श्रुतार्थस्य अनुपपत्या तस्य कल्पना कर्तव्या इयं च कल्पना प्रमाणान्तरेणापि न विरुद्ध्यते। प्रकृतस्थले विरुद्धं नाम किम् इत्याशङ्कायां सर्वैः प्रमाणैः विनष्टस्य असतः अनारब्धस्य कस्यचित् वस्त्वन्तरस्य कार्यारम्भ-कत्वम्। अवस्थानं नाम किमिति विविदिषायां क्षणमात्रवर्तिनः प्रमाणविरुद्धत्वम्-

**अतः विंनष्टस्यासतोऽनारब्धवस्त्वन्तरस्य कार्यारम्भकत्वम्। अवस्था-नञ्च क्षणमात्रवर्तिनः प्रमाणविरुद्धमेव अतोऽपूर्वमेव कल्पनीयम्।**[13]

अपूर्वस्य कल्पनायां श्रुतेः विरोधो न भवति यतः यागस्य शक्तिमत्वम् अवान्तरव्यापारत्त्वं प्रसिद्धम्। यथा काष्ठादीनां ज्वालया। न च व्यधिकरणताया आपादनं तिष्ठते यतः कार्यानुमेया शक्तिर्भवति। अतः एतत्प्रसिद्ध्यति यागशक्तिः आत्मनि तिष्ठति। यथोक्तं ग्रन्थकारेण-

**न हि शक्त्याऽवान्तरव्यापारेण वा व्यधिकरणतामापादयति काष्ठा-दीनामिव ज्वालया। न चावश्यं शक्तिमत्येवावतिष्ठते कार्यानुमेया हि**

**शक्तिः यत्रैव कार्यायालं तत्रैव कल्प्यते। अतो यागशक्तिरात्मनि तिष्ठतीत्यविरोधः।**[14]

अवान्तरव्यापारस्य च एतदेव तत्त्वं विद्यते यत् समीहितोदेशप्रवृत्तेन करणेन तत् सिद्ध्यर्थमन्तरा साध्यमानत्वम्। यथोदाहरणाय ज्वालायाः काष्ठैः। अतः अपूर्वम् अस्तीति सिद्ध्यति एतच्च अपूर्वं फलसाधनस्य कर्मणः अवान्तरव्यापाररूपम्। पुनश्च अङ्गानां फलवदुपकारसाधनानामेषात्र प्रक्रिया। अतः वाक्यार्थमुदेति यागेन स्वर्गं भावयेत् वाक्यार्थेन प्रथमताया फलवाक्येन कर्मणः फलसाधनत्वं बोध्यते। कथं विनेश्वरेण फलं कर्तव्यम् इत्याशङ्काशायामपूर्वं कृत्वा फलं कर्तव्यम्। अपूर्वञ्च कथं कर्तव्यम् इति विविदिषायाम् अङ्गानाम् अनुष्ठानमुखेनेति। यथा बभाण शास्त्रदीपिकाकारः- प्रथमं विनश्वरेण फलं कर्तव्यम्। अपूर्वञ्च कथं कर्तव्यम् इति विविदिषायाम् अङ्गानाम् अनुष्ठानफलसाधनत्वं बोध्यते-

**यागेन स्वर्गं कुर्यादिति। कथं विनश्वरेण फलं कर्तव्यम् इत्यपेक्षायामपूर्वं कृत्वेत्युच्यते। कथमपूर्वं क्रियत इत्यपेक्षायामङ्गानुष्ठानप्रकारेणेति।**[15]

अथातः पूर्वापरवर्तिभिः कालैः अङ्गव्यापारैः विषयीकृतस्य यागस्य अपूर्वस्य कल्पना भवति। दर्शपूर्णमासयोः शब्दयोः पक्षद्वयस्य उपस्थितिः वर्तते पक्षद्वयानामुपस्थित्या एकैकं प्रतिसमुदायमपूर्वं कल्पनीयम्। स्वरूपेण अपूर्वस्य यदि एवं पृथक् पृथक् अपूर्वस्य कल्पना स्यात्तदा षड्यागेभ्यः प्रथममेव षण्णामपूर्वाणां कल्पनं स्यात् ततः गौरवदोषः भवेत्। अतः एकमेव फलस्य अपूर्वं भवति। यथाह शास्त्रदीपिकाकारः

**यदि पुनः षड्यागेभ्यः प्रथममेव षड्पूर्वाणि कल्प्येरन् ततोऽपूर्वार्थत्वाऽङ्गानामङ्गोपकृतेभ्योऽपूर्वं सिद्धौ। पुनरपि षड्पर्वाणि कल्प्यानि स्युरिति गौरवं स्यात्। तस्मादेकमेव फलापूर्वम्।**[16]

प्रधानरूपं उत्पत्त्यपूर्वाणां भेदो भवति साकमेव अङ्गानामपि क्रतूपकारत्वेन स्वीकारो भवति एतेषां करणं क्षणिकत्वात् न भवति अपितु स्वरूपेण भवति एतेषां मुखेनैव अपूर्वाणाम् आरम्भो भवति। अथातः आहत्य प्रधानस्य सामर्थ्यस्य उद्बोधनं फलारम्भ-उन्मुखत्वरूपं यदनुग्रहं परमोपकारकं सर्वाणि अवान्तरव्यापाररूपाणि अपूर्वाणि जनयन्ति। अथात्र विभागद्वयं कल्प्यते सन्निपत्योपकारकाणि आरादुपकारकाणि इति भेदात्। एतेषां सर्वेषां प्रकारभेदेऽपि सर्वाण्यङ्गानि यागस्य अपूर्वनिष्पत्तौ अनुग्राहकाणि भवन्तीति दिशा सर्वेभ्यः भेदेभ्यः यागमुखेन अपूर्वस्य निष्पत्तिः भवतीति सिद्ध्यति अनेन च अपूर्वस्य अस्तित्वस्य सिद्धिर्भवति। यथाह ग्रन्थकारः-

**तत्र त्वयं विभागः सन्निपत्योपकारकाणि द्रव्यदेवत्पसंस्कारद्वारेण यागस्वरूपस्यैव शकत्यतिशयमादधानानि तदुपत्पत्त्यपूर्वानिष्पत्तौ व्याप्रियन्ते। तद्वारेण फलापर्वर्गै। आरादुपकारकाणि तु साक्षादेवोत्पत्त्यपूर्वेभ्यः फलापूर्वानिष्पत्तौ। एवं प्रकारभेदे सत्यपि सर्वाण्यङ्गानि यागापूर्वनिष्पत्तावनुग्राहकाणि भवन्तीत्येव मेकरूपोत्थम्भावेन स्वीक्रियन्ते। तस्मादस्त्यपूर्वम्।**[17]

इत्येवम्प्रकारेण शास्त्रदीपिकादिशा अपूर्वस्य अस्तित्त्वस्य विवेचनं यथाग्रन्थं यथामति मया प्रत्यपादि।

**संदर्भ ग्रन्थः -**


1 यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
भिलाषोपनीतं च तत् सुखं स्वःपदास्पदम्।।

2 भुवनत्रयविख्यातश्रीमद्यज्ञात्मनन्दनः...'(न्यायरत्नमाला, पृष्ठम्- ३१९)।

3 'यद्यपि शास्त्रदीपिकादौ क्वचित् क्वचित् सङ्ग्रहश्लोकोऽस्ति' – न्यायमालाविस्तरः।

4 शब्दकल्पद्रुमः

5 शास्त्रदीपिका द्वितीयोऽध्यायः प्रथमः पादः अपूर्वास्तित्वाधिकरणम्

6 शास्त्रदीपिका द्वितीयोऽध्यायः प्रथमः पादः अपूर्वास्तित्वाधिकरणम्

7 पाणिनीयाष्टाध्यायी

8 शास्त्रदीपिका द्वितीयोऽध्यायः प्रथमः पादः अपूर्वास्तित्वाधिकरणम्

9 शास्त्रदीपिका द्वितीयोऽध्यायः प्रथमः पादः अपूर्वास्तित्वाधिकरणम्

10 शास्त्रदीपिका द्वितीयोऽध्यायः प्रथमः पादः अपूर्वास्तित्वा-धिकरणम्

11 शास्त्रदीपिका प्र.अ.प्र.पा.अपूर्वा.

12 शास्त्रदीपिका प्र.अ.प्र.पा.अपूर्वा.

13 शास्त्रदीपिका प्र.अ.प्र.पा.अपूर्वा.

14 शास्त्रदीपिका प्र.अ.प्र.पा.अपूर्वा.

15 शास्त्रदीपिका द्वितीयोऽध्यायः प्रथमः पादः अपूर्वास्तित्वा-धिकरणम्

16 शास्त्रदीपिका द्वितीयोऽध्यायः प्रथमः पादः अपूर्वास्तित्वा-धिकरणम्

17 शास्त्रदीपिका द्वितीयोऽध्यायः प्रथमः पादः अपूर्वास्तित्वा-धिकरणम्